॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

सप्तमकाण्डे तृतीयः प्रश्नः

सत्रजातनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

प्रजवँव्वा एतेन यन्ति यद्दशममहः पापावहीयँव्वा एतेन भवन्ति यद्दशममहर्यो वै प्रजवँय्यता-
मपथेन प्रतिपद्यते यः स्थाणुꣳ हन्ति यो भ्रेषन्न्येति स हीयते स यो वै दशमेऽहन्नविवाक्य उपह-
न्यते स हीयते तस्मै य उपहताय व्याह तमेवान्वारभ्य समश्नुतेऽथ यो व्याह स (सः) ॥ [१] ॥
(हीयते) हीयते तस्माद्दशमेऽहन्नविवाक्य उपहताय न व्युच्यमथो खल्वाहुर्यज्ञस्य वै समृद्धेन
देवाः सुवर्गँल्लोकमायन् यज्ञस्य व्यृद्धेनासुरान् पराऽभावयन्निति यत् खलु वै यज्ञस्य समृद्धन्त-
द्यजमानस्य यद्व्यृद्धन्तद्भ्रातृव्यस्य स यो वै दशमेऽहन्नविवाक्य उपहन्यते स एवार्तिं रेचयति ते
ये बाह्या दृशीकवः ॥ [२] ॥ स्युस्ते वि ब्रूयुर्यदि तत्र न विन्देयुरन्तस्सदसाद्व्युच्यँय्यदि तत्र
न विन्देयुर्गृहपतिना व्युच्यन्तद्व्युच्यमेवाथ वा एतथ् सर्पराज्ञिया ऋग्भिः स्तुवन्तीयँव्वै सर्पतो
राज्ञी यद्वा अस्याङ्किञ्चार्चन्ति यदानृचुस्तेनेयꣳ सर्पराज्ञी ते यदेव किञ्च वाचाऽऽनृचुर्यदतोऽद्ध्य-
र्चितार ॥ [३] ॥ स्तदुभयमाप्त्वाऽवरुद्ध्योत् तिष्ठामेति ताभिर्मनसा स्तुवते न वा इमामश्वरथो
नाऽश्वतरीरथः सद्यः पर्याप्तुमर्हति मनो वा इमाꣳ सद्यः पर्याप्तुमर्हति मनः परिभवितुमथ ब्रह्म
वदन्ति परिमिता वा ऋचः परिमितानि सामानि परिमितानि यजूꣳष्यथैतस्यैवान्तो नास्ति यद्ब्रह्म
तत्प्रतिगृणत आ चक्षीत स प्रतिगरः ॥ [४] ॥

(व्याह स दृशीकवोँ ऽर्चितारः स एकञ्च) ॥ १ ॥

ब्रह्मवादिनो वदन्ति किन्द्वादशाहस्य प्रथमेनाहुर्त्विजाय्यँजमानो वृङ्क्त इति तेज इन्द्रिय-
मिति किन्द्वितीयेनेति प्राणानन्नाद्यमिति किन्तृतीयेनेति त्रीनिमाँल्लोँकानिति किञ्चतुर्थेनेति
चतुष्पदः पशूनिति किम्पञ्चमेनेति पञ्चाक्षराम्पङ्क्तिमिति किꣳ षष्ठेनेति षडृतूनिति किꣳ सप्त-
मेनेति सप्तपदाꣳ शक्करीमिति ॥ [५] ॥ किमष्टमेनेत्यष्टाक्षराङ्गायत्रीमिति किन्नवमेनेति
त्रिवृतꣳ स्तोममिति किन्दशमेनेति दशाक्षराव्विँराजमिति किमेकादशेनेत्येकादशाक्षरा-
न्त्रिष्टुभमिति किन्द्वादशेनेति द्वादशाक्षराञ्जगतीमित्येतावद्वा अस्ति यावदेतद्यावदेवास्ति तदे-
षाव्वृँङ्क्ते ॥ [६] ॥

(शक्करीमित्ये कचत्वारिꣳशच्च) ॥ २ ॥

एष वा आप्तो द्वादशाहो यत् त्रयोदशरात्रः समानꣳ ह्येतदहर्यत् प्रायणीयश्चोदयनीयश्च
त्र्यतिरात्रो भवति त्रय इमे लोका एषाँल्लोँकानामाप्त्यै प्राणो वै प्रथमोऽतिरात्रो व्यानो द्विती-
योऽपानस्तृतीयः प्राणापानोदानेष्वेवान्नाद्ये प्रति तिष्ठन्ति सर्वमायुर्यन्ति य एवव्विँद्वाꣳसस्त्रयोद-
शरात्रमासते तदाहुर्वाग्वा एषा वितता ॥ [७] ॥ यद् द्वादशाहस्ताव्विँच्छिन्द्युर्यन्मद्ध्येऽति-
रात्रङ्कुर्युरुपदासुका गृहपतेर्वाख् स्यादुपरिष्टाच्छन्दोमानाम्महाव्रतङ्कुर्वन्ति सन्ततामेव वाचमव
रुन्धतेऽनुपदासुका गृहपतेर्वाग्भवति पशवो वै छन्दोमा अन्नम्महाव्रतय्यँदुपरिष्टाच्छन्दोमाना-
म्महाव्रतङ्कुर्वन्ति पशुषु चैवान्नाद्ये च प्रति तिष्ठन्ति ॥ [८] ॥

(वितता त्रिचत्वारिꣳशच्च) ॥ ३ ॥

आदित्या अकामयन्तोभयोर्लोँकयोर् ऋद्ध्नुयामेति त एतञ्चतुर्दशरात्रमपश्यन्तमाऽहरन्
तेनायजन्त ततो वै त उभयोर्लोँकयोरादृध्नुवन्नस्मिꣳश्चामुष्मिꣳश्च य एवव्विँद्वाꣳस श्चतुर्दश-
रात्रमासत उभयोरेव लोकयोर्ऋद्ध्नुवन्त्यस्मिꣳश्चामुष्मिꣳश्च चतुर्दशरात्रो भवति सप्त ग्राम्या
ओषधयः सप्ताऽऽ*रण्या उभयीषामवरुद्ध्यै यत् पराचीनानि पृष्ठानि ॥ [९] ॥ भवन्त्यमुमेव
तैर्लोँकमभि जयन्ति यत् प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोँकमभि जयन्ति त्रयस्त्रिꣳशौ

मद्ध्यतः स्तोमौ भवतः साम्राँज्यमेव गच्छन्त्यधिराजौ भवतोऽधिराजा एव समानानाम्भव-
न्त्यतिरात्रावभितो भवतः परिगृहीत्यै ॥ [१०] ॥

(पृष्ठानि चतुस्त्रिꣳशच्च) ॥ ४ ॥

प्रजापतिः सुवर्गँल्लोकमैत् तन्देवा अन्वायन् तानादित्याश्च पशवश्चान्वायन् ते देवा अब्रु-
वन्यान् पशूनुपाजीविष्म त इमेऽन्वाग्मन्निति तेभ्य एतञ्चतुर्दशरात्रम्प्रत्यौहन् त आदित्याः
पृष्ठैः सुवर्गँल्लोकमाऽरोहन् त्र्यहाभ्यामस्मिँल्लोके पशून् प्रत्यौहन् पृष्ठैरादित्या अमुष्मिँल्लोक
आर्ध्नुवन् त्र्यहाभ्यामस्मि ॥ [११] ॥ ल्लोके पशवो य एवँविद्वाꣳसश्चतुर्दशरात्रमासत उभ-
योरेव लोकयोर् ऋध्नुवन्त्यस्मिꣳश्चामुष्मिꣳश्च पृष्ठैरेवाऽमुष्मिँल्लोक ऋध्नुवन्ति त्र्यहाभ्याम-
स्मिँल्लोके ज्योतिर्गौरायुरिति त्र्यहो भवतीयँव्वाव ज्योतिरन्तरिक्षङ्गौरसावायुरिमानेव लोका-
नभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवधꣳ स्यान्मद्ध्ये पृष्ठानि भवन्ति सविवधत्वायौ
॥ [१२] ॥ जो वै वीर्यम्पृष्ठान्योज एव वीर्यम्मद्ध्यतो दधते बृहद्रथन्तराभ्याँय्यन्तीयँव्वाव रथ-
न्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव
सुवर्गँल्लोकँय्यन्ति पराञ्चो वा एते सुवर्गँल्लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्
त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर् ऋद्ध्वोत् तिष्ठन्ति चतुर्दशैता-
स्तासाँय्या दश दशाक्षरा विराडन्नँव्विराड् विराजैवान्नाद्यमव रुन्धते याश्चतस्रश्चतस्रो दिशो
दिक्ष्वेव प्रति तिष्ठन्त्यतिरात्रावभितो भवतः परिगृहीत्यै ॥ [१३] ॥

(आर्ध्नुवन् त्र्यहाभ्यामस्मिन्थ् सविवधत्वाय प्रतिष्ठित्या एकत्रिꣳशच्च) ॥ ५ ॥

इन्द्रो वै सदृङ् देवताभिरासीथ् स न व्यावृतमगच्छथ् स प्रजापतिमुपाधावत् तस्मा एतम्प-
ञ्चदशरात्रम्प्रायच्छत् तमाऽहरत् तेनायजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एव-
वँव्विद्वाꣳसः पञ्चदशरात्रमासते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छन्ति ज्योतिर्गौरायुरिति त्र्यहो

भवतीयँव्वाव ज्योतिरन्तरिक्षं ॥ [१४] ॥ गौरसावायुरिष्वेव लोकेषु प्रति तिष्ठन्त्यसत्रँव्वा एत-द्यदछन्दोमयँय्यच्छन्दोमा भवन्ति तेन सत्रन्देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्य-म्पृष्ठानि पशवः छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति पञ्चदशरात्रो भवति पञ्चदशो वज्रो वज्रमेव भ्रातृव्येभ्यः प्र हरन्त्यतिरात्रावभितो भवत इन्द्रियस्य परिगृहीत्यै ॥ [१५] ॥

(अन्तरिक्षमिन्द्रियस्यैकञ्च) ॥ ६ ॥

इन्द्रो वै शिथिल इवाऽप्रतिष्ठित आसीथ् सोऽसुरेभ्योऽबिभेथ् स प्रजापतिमुपाऽधावत् तस्मा एतम्पञ्चदशरात्रँव्वज्रम्प्रायच्छत् तेनासुरान् पराभाव्य विजित्य श्रियमगच्छदग्निष्टुता पाप्मान-न्निरदहत पञ्चदशरात्रेणौजो बलमिन्द्रियँव्वीर्यमात्मन्नधत्त य एवँव्विद्वाꣳसः पञ्चदशरात्रमासते भ्रातृव्यानेव पराभाव्य विजित्य श्रियङ्गच्छन्त्यग्निष्टुता पाप्मानन्निः ॥ [१६] ॥ दहन्ते पञ्चदश-रात्रेणौजो बलमिन्द्रियँव्वीर्यमात्मन् दधत एता एव पशव्याः पञ्चदश वा अर्द्धमासस्य रात्र-योऽर्द्धमासशः संवँत्सर आप्यते संवँत्सरम्पशवोऽनु प्र जायन्ते तस्मात् पशव्या एता एव सुवर्ग्याः पञ्चदश वा अर्द्धमासस्य रात्रयोऽर्द्धमासशः संवँत्सर आप्यते संवँत्सरः सुवर्गो लोकस्तस्माथ् सुवर्ग्या ज्योतिर्गौरायुरिति त्र्यहो भवतीयँव्वाव ज्योतिरन्तरिक्षं ॥ [१७] ॥ गौरसावायुरिमानेव लोकानभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवधꣳ स्यान्मद्ध्ये पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यम्पृष्ठान्योज एव वीर्यम्मद्ध्यतो दधते बृहद्रथन्तराभ्याँय्यन्ती-यँव्वाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गँल्लोक ॥ [१८] ॥ यँय्यन्ति पराञ्चो वा एते सुवर्गँल्लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर् ऋद्ध्वोत् तिष्ठन्ति पञ्चदशैतास्तासाँय्या दश दशाक्षरा विराडन्नँव्विराड् विराजैवान्नाद्यमव रुन्धते याः पञ्च पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्त्यतिरात्रावभितो भवत इन्द्रियस्य वीर्यस्य प्रजायै पशूनाम्परिगृहीत्यै ॥ [१९] ॥

(गच्छन्त्यग्निष्टुता पाप्मानन्निरन्तरिक्षं लोकं प्रजायै द्वे च) ॥ ७ ॥

प्रजापतिरकामयतान्नादः स्यामिति स एतꣳ सप्तदशरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै सोँऽन्नादोऽभवद्य एवव्विँद्वाꣳसः सप्तदशरात्रमासतेऽन्नादा एव भवन्ति पञ्चाहो भवति पञ्च वा ऋतवः सँव्वथ्सर ऋतुष्वेव सँव्वथ्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाऽव रुन्धतेऽसत्रँव्वा एत ॥ [२०] ॥ यद्छन्दोमय्ँयच्छन्दोमा भवन्ति तेन सत्रन्देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यम्पृष्ठानि पशवः छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति सप्तदशरात्रो भवति सप्तदशः प्रजापतिः प्रजापतेराप्त्या अतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै ॥ [२१] ॥

(एतथ् सप्तत्रिꣳशच्च) ॥ ८ ॥

सा विराड् विक्रम्यातिष्ठद्ब्रह्मणा देवेष्वन्नेनासुरेषु ते देवा अकामयन्तोभयꣳ सँव्वृञ्जीमहि ब्रह्म चान्नञ्चेति त एता विꣳशतिꣳ रात्रीरपश्यन् ततो वै त उभयꣳ समवृञ्जत ब्रह्म चान्नञ्च ब्रह्मवर्चसिनोँऽन्नादा अभवन्य एवव्विँद्वाꣳस एता आसत उभयमेव सँव्वृञ्जते ब्रह्म चान्नञ्च ॥ [२२] ॥ ब्रह्मवर्चसिनोँऽन्नादा भवन्ति द्वे वा एते विराजौ तयोरेव नाना प्रति तिष्ठन्ति विꣳशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पद्या यावानेव पुरुषस्तमाप्त्वोत् तिष्ठन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयँव्वाव ज्योतिरन्तरिक्षङ्गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं ॥ [२३] ॥ ल्ँलोकमभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवधꣳ स्यान्मद्ध्ये पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यम्पृष्ठान्योज एव वीर्यम्मद्ध्यतो दधते बृहद्रथन्तराभ्याँय्यन्तीयँव्वाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गँल्लोकँय्यन्ति पराञ्चो वा एते सुवर्गँल्लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्ल्लोकयोर्ऋद्ध्वोत् तिष्ठन्त्यतिरात्रावभितो भवतो ब्रह्मवर्चसस्यान्नाद्यस्य परिगृहीत्यै ॥ [२४] ॥

(वृञ्जते ब्रह्म चान्नञ्च सुवर्गं मेते सुवर्गं त्रयोविꣳशतिश्च) ॥ ९ ॥

असावादित्योऽस्मिँल्लोक आसीत् तन्देवाः पृष्ठैः परिगृह्य सुवर्गँल्लोकमगमयन् परैरवस्तात् पर्यगृह्णन् दिवाकीर्त्येन सुवर्गे लोके प्रत्यस्थापयन् परैः परस्तात् पर्यगृह्णन् पृष्ठैरुपावारोहन्थ्स वा असावादित्योऽमुष्मिँल्लोके परैरुभयतः परिगृहीतो यत् पृष्ठानि भवन्ति सुवर्गमेव तैर्लोकय्यँजमाना यन्ति परैरवस्तात् परि गृह्णन्ति दिवाकीर्त्येन ॥ [२५] ॥ सुवर्गे लोके प्रति तिष्ठन्ति परैः परस्तात् परि गृह्णन्ति पृष्ठैरुपावरोहन्ति यत् परे परस्तान्न स्युः पराञ्चः सुवर्गाल्लोकान्निष्पद्येरन्यदवस्तान्न स्युः प्रजा निर्दहेयुरभितो दिवाकीर्त्यम्परस्सामानो भवन्ति सुवर्ग एवैनाँल्लोक उभयतः परि गृह्णन्ति यजमाना वै दिवाकीर्त्यꣳ सँवँथ्सरः परस्सामानोऽभितो दिवाकीर्त्यम्परस्सामानो भवन्ति सँवँथ्सर एवोभयतः ॥ [२६] ॥ प्रति तिष्ठन्ति पृष्ठव्वै दिवाकीर्त्यम्पार्श्वे परस्सामानोऽभितो दिवाकीर्त्यम्परस्सामानो भवन्ति तस्मादभितः पृष्ठम्पार्श्वे भूयिष्ठा ग्रहा गृह्यन्ते भूयिष्ठꣳ शस्यते यज्ञस्यैव तन्मद्ध्यतो ग्रन्थिङ्ग्रथ्नन्त्यविस्रꣳसाय सप्त गृह्यन्ते सप्त वै शीर्षण्याः प्राणाः प्राणानेव यजमानेषु दधति यत् पराचीनानि पृष्ठानि भवन्त्यमुमेव तैर्लोकमभ्यारोहन्ति यदिमँल्लोकन्न ॥ [२७] ॥ प्रत्यवरोहेयुरुद्वा माद्येयुर्यजमानाः प्र वा मीयेरन्यत् प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकम्प्रत्यवरोहन्त्यथो अस्मिन्नेव लोके प्रति तिष्ठन्त्यनुन्मादायेन्द्रो वा अप्रतिष्ठित आसीथ् स प्रजापतिमुपाधावत् तस्मा एतमेकविꣳशतिरात्रम्प्रायच्छत् तमाऽहरत् तेनायजत ततो वै स प्रत्यतिष्ठद्ये बहुयाजिनोऽप्रतिष्ठिताः ॥ [२८] ॥ स्युस्त एकविꣳशतिरात्रमासीरन् द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳश एतावन्तो वै देवलोकास्तेष्वेव यथा पूर्वम्प्रति तिष्ठन्त्यसावादित्यो न व्यरोचत स प्रजापतिमुपाधावत् तस्मा एतमेकविꣳशतिरात्रम्प्रायच्छत् तमाऽहरत् तेनायजत ततो वै सोऽरोचत य एवं विद्वाꣳस एकविꣳशतिरात्रमासते रोचन्त एवैकविꣳशतिरात्रो भवति रुग्वा एकविꣳशो रुचमेव गच्छन्त्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकविꣳशोऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै ॥ [२९] ॥

(गृह्णन्ति दिवाकीर्त्येनै वोभयतो ना प्रतिष्ठिता आसत एकविꣳशतिश्च) ॥ १० ॥

अर्वाङ् यज्ञः सङ्क्रामत्वमुष्मादधि मामभि। ऋषीणाय्यँः पुरोहितः॥ निर्देवन्निर्वीरङ्कृत्वा विष्कन्धन्तस्मिन् हीयताय्योँऽस्मान् द्वेष्टि। शरीरय्यँज्ञशमलङ्कुसीदन्तस्मिन्थ्सीदतु योँऽस्मान्

द्वेष्टि॥ यज्ञ यज्ञस्य यत् तेजस्तेन संक्राम मामभि। ब्राह्मणानृत्विजो देवान् यज्ञस्य तपसा ते सवाहमा हुवे॥ इष्टेन पक्वमुप ॥ [३०] ॥ ते हुवे सवाहम्। सन्ते वृञ्जे सुकृतꣳ सम्प्रजाम्पशून्॥ प्रैषान्थ्सामिधेनीराघारावाज्यभागावाश्रुतम्प्रत्याश्रुतमा शृणामि ते। प्रयाजानूयाजान्थ्स्विष्टकृतमिडामाशिष आ वृञ्जे सुवः॥ अग्निनेन्द्रेण सोमेन सरस्वत्या विष्णुना देवताभिः। याज्यानुवाक्याभ्यामुप ते हुवे सवाहय्ँयज्ञमा ददे ते वषट्कृतम्॥ स्तुतꣳ शस्त्रम्प्रतिगरङ्ग्रहमिडामाशिष ॥ [३१] ॥ आ वृञ्जे सुवः। पत्नीसय्ँयाजानुप ते हुवे सवाहꣳ समिष्टयजुरा ददे तव॥ पशून्थ्सुतम्पुरोडाशान्थ्सवनान्योत यज्ञम्। देवान्थ्सेन्द्रानुप ते हुवे सवाहमग्निमुखान्थ्सोमवतो ये च विश्वे ॥ [३२] ॥

(उप ग्रहमिडामाशिषो द्वात्रिꣳशच्च) ॥ ११ ॥

भूतम्भव्यम्भविष्यद्वषट्थ् स्वाहा नम ऋख् साम यजुर्वषट्थ् स्वाहा नमो गायत्री त्रिष्टुब् जगती वषट्थ् स्वाहा नमः पृथिव्यन्तरिख्षन्द्यौ र्वषट्थ् स्वाहा नमोऽग्निर्वायुः सूर्यो वषट्थ् स्वाहा नमः प्राणोव्यानोऽपानो वषट्थ् स्वाहा नमोऽन्नङ्कृषिर्वृष्टिर्वषट्थ् स्वाहा नमः पितापुत्रः पौत्रो वषट्थ् स्वाहा नमो भूर्भुवः सुव र्वषट्थ् स्वाहा नमः ॥ [३३] ॥

(भुव श्चत्वारि च) ॥ १२ ॥

आ मे गृहा भवन्त्वा प्रजा म आ मा यज्ञो विशतु वीर्यावान्। आपो देवीर्यज्ञिया माऽऽविशन्तु सहस्रस्य मा भूमा मा प्र हासीत्॥ आ मे ग्रहो भवत्वा पुरोरुख् स्तुतशस्त्रे माऽऽविशताꣳ समीची। आदित्या रुद्रा वसवो मे सदस्याः सहस्रस्य मा भूमा मा प्र हासीत्॥ आ माऽग्निष्टोमो विशतू क्थ्यश्चातिरात्रो माऽऽविशत्वापिशर्वरः। तिरोअह्निया मा सुहुता आ विशन्तु सहस्रस्य मा भूमा मा प्र हासीत् ॥ [३४] ॥

(अग्निष्टोमो विशत्व ष्टादश च) ॥ १३ ॥

अग्निना तपोऽन्वभवद्वाचा ब्रह्म मणिना रूपाणीन्द्रेण देवान् वातेन प्राणान्थ् सूर्येण द्याञ्च-न्द्रमसा नक्षत्राणि यमेन पितृन् राज्ञा मनुष्यान् फलेन नादेयानजगरेण सर्पान् व्याघ्रे-णाऽऽ*रण्यान् पशूञ्छ्येनेन पतत्रिणो वृष्णाऽश्वानृषभेण गा बस्तेनाजा वृष्णिनाऽवीर्व्री-हिणाऽन्नानि यवेनौषधीर्न्यग्रोधेन वनस्पतीनुदुबंरेणोर्जङ्गायत्रिया छन्दाꣳसि त्रिवृता स्तोमान् ब्राह्मणेन वाचम् ॥ [३५] ॥

(ब्राह्मणेनै कञ्च) ॥ १४ ॥

स्वाहाऽऽधिमाधीताय स्वाहा स्वाहाऽऽधीतम्मनसे स्वाहा स्वाहा मनः प्रजापतये स्वाहा काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहाऽदित्यै स्वाहाऽदित्यै मह्यै स्वाहाऽदित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै बृहत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा विष्णवे स्वाहा विष्णवे निखुर्यपाय स्वाहा विष्णवे निभूयपाय स्वाहा सर्वस्मै स्वाहा ॥ [३६] ॥

(पुरुरूपाय स्वाहा दश च) ॥ १५ ॥

दद्भ्यः स्वाहा हनूभ्याꣳ स्वाहोष्ठाभ्याꣳ स्वाहा मुखाय स्वाहा नासिकाभ्याꣳ स्वाहाऽक्षीभ्याꣳ स्वाहा कर्णाभ्याꣳ स्वाहा पार इक्षवोऽवार्येभ्यः पक्ष्मभ्यः स्वाहाऽवार इक्षवः पार्येभ्यः पक्ष्मभ्यः स्वाहा शीर्ष्णे स्वाहा भ्रूभ्याꣳ स्वाहा ललाटाय स्वाहा मूर्ध्ने स्वाहा मस्ति-ष्काय स्वाहा केशेभ्यः स्वाहा वहाय स्वाहा ग्रीवाभ्यः स्वाहा स्कन्धेभ्यः स्वाहा कीक-साभ्यः स्वाहा पृष्टीभ्यः स्वाहा पाजस्याय स्वाहा पार्श्वाभ्याꣳ स्वाहा ॥ [३७] ॥ ऽꣳसाभ्याꣳ स्वाहा दोषभ्याꣳ स्वाहा बाहुभ्याꣳ स्वाहा जङ्घाभ्याꣳ स्वाहा श्रोणीभ्याꣳ स्वाहोरुभ्याꣳ स्वाहाऽष्ठीवद्भ्याꣳ स्वाहा जङ्घाभ्याꣳ स्वाहा भसदे स्वाहा शिखण्डेभ्यः स्वाहा वालधानाय स्वाहाऽऽण्डाभ्याꣳ स्वाहा शेपाय स्वाहा रेतसे स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा पद्भ्यः स्वाहा शफेभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा लोहिताय स्वाहा माꣳसाय

स्वाहा स्नावभ्यः स्वाहाऽस्थभ्यः स्वाहा मज्जभ्यः स्वाहा ऽङ्गेभ्यः स्वाहाऽऽत्मने स्वाहा सर्वस्मै स्वाहा ॥ [३८] ॥

(पार्श्वाभ्याꣳ स्वाहा मज्जभ्यः स्वाहा षट् च) ॥ १६ ॥

अङ्ग्येताय स्वाहाऽञ्जिसक्थाय स्वाहा शितिपदे स्वाहा शितिककुदे स्वाहा शितिरन्ध्राय स्वाहा शितिपृष्ठाय स्वाहा शित्यꣳसाय स्वाहा पुष्पकर्णाय स्वाहा शित्योष्ठाय स्वाहा शितिभ्रवे स्वाहा शितिभसदे स्वाहा श्वेतानूकाशाय स्वाहाऽञ्जये स्वाहा ललामाय स्वाहाऽसितज्ञवे स्वाहा कृष्णैताय स्वाहा रोहितैताय स्वाहाऽरुणैताय स्वाहेदृशाय स्वाहा कीदृशाय स्वाहा तादृशाय स्वाहा सदृशाय स्वाहा विसदृशाय स्वाहा सुसदृशाय स्वाहा रूपाय स्वाहा सर्वस्मै स्वाहा ॥ [३९] ॥

(रूपाय स्वाहा द्वे च) ॥ १७ ॥

कृष्णाय स्वाहा श्वेताय स्वाहा पिशङ्गाय स्वाहा सारङ्गाय स्वाहाऽरुणाय स्वाहा गौराय स्वाहा बभ्रवे स्वाहा नकुलाय स्वाहा रोहिताय स्वाहा शोणाय स्वाहा श्यावाय स्वाहा श्यामाय स्वाहा पाकलाय स्वाहा सुरूपाय स्वाहाऽनुरूपाय स्वाहा विरूपाय स्वाहा सरूपाय स्वाहा प्रतिरूपाय स्वाहा शबलाय स्वाहा कमलाय स्वाहा पृश्नये स्वाहा पृश्निसक्थाय स्वाहा सर्वस्मै स्वाहा ॥ [४०] ॥

(कृष्णाय षट्चत्वारिꣳशत्) ॥ १८ ॥

ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा काण्डेभ्यः स्वाहा वल्शेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहाऽगृहीतेभ्यः स्वाहाऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा सर्वस्मै स्वाहा ॥ [४१] ॥

(ओषधीभ्य श्चतुर्विꣳशतिः) ॥ १९ ॥

वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा स्कन्धोभ्यः स्वाहा शाखाभ्यः स्वाहा पर्णेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहाऽगृहीतेभ्यः स्वाहाऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा शिष्टाय स्वाहाऽतिशिष्टाय स्वाहा परिशिष्टाय स्वाहा सꣳशिष्टाय स्वाहोच्छिष्टाय स्वाहा रिक्ताय स्वाहाऽरिक्ताय स्वाहा प्ररिक्ताय स्वाहा सꣳरिक्ताय स्वाहोद्रिक्ताय स्वाहा सर्वस्मै स्वाहा ॥ [४२] ॥

(वनस्पतिभ्यः षट् चत्वारिꣳशत्) ॥ २० ॥

समाप्ति कोर्वैः

(प्रजवं ब्रह्मवादिनः कि मेष वा आप्त आदित्या उभयोः प्रजापतिरन्वाय न्निन्द्रो वै सदङ् ङिन्द्रो वै शिथिलः प्रजापतिरकामयताऽन्नादः सा विराड सावादित्यो ऽर्वाङ् भूत मा मे ऽग्निना स्वाहाऽऽधिन् दद्भ्यो ऽ ज्येताय कृष्णा यौषधीभ्यो वनस्पतिभ्यो विꣳशतिः)

(प्रजवं प्रजापति र्यद्छन्दोमं ते हुवे सवाऽह मोषधीभ्यो द्विचत्वारिꣳशत्)

(प्रजवꣳ सर्वस्मै स्वाहा)

॥ हरिः ॐ ॥

सप्तमकाण्डे तृतीयः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
२०	४२

ॐ